# Shambhu Stotram

# शम्भुस्तोत्रम्

## Document Information

Text title : shambhustotra

File name : shambhustotra.itx

Category : shiva, stotra

Location : doc_shiva

Transliterated by : Sridhar Seshagiri sridhar.seshagiri at gmail.com

Proofread by : Sridhar Seshagiri sridhar.seshagiri at gmail.com

Description-comments : Hymn on Lord Shiva

Latest update : February 15, 2002

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 28, 2022

*sanskritdocuments.org*

# शम्भुस्तोत्रम्

नानायोनिसहस्रकोटिषु मुहुः सम्भूय सम्भूय तद्-
गर्भावासनिरन्तदुःखनिवहं वक्तुं न शक्यं च तत् ।
भूयो भूय इहानुभूय सुतरां कष्टानि नष्टोऽस्म्यहं
त्राहि त्वं करुणातरङ्गितदृशा शम्भो दयाम्भोनिधे ॥ १॥

बाल्ये ताडनपीडनैर्बहुविधैः पित्रादिभिर्बोधितः
तत्कालोचितरोगजालजनितैर्दुःखैरलं बाधितः ।
लीलालौल्यगुणीकृतैश्च विविधैर्दुश्चोष्टितैः क्लेशितः
सोऽहं त्वां शरणं व्रजाम्यव विभो शम्भो दयाम्भोनिधे ॥ २॥

तारुण्ये मदनेन पीडिततनुः कामातुरः कामिनी-
सक्तस्तद्वशगः स्वधर्मविमुखः सद्भिः सदा दूषितः ।
कर्माकार्षमपारनारकफलं सौख्याशया दुर्मतिः
त्राहि त्वं करुणातरङ्गितदृशा शम्भो दयाम्भोनिधे ॥ ३॥

वृद्धत्वे गलिताखिलेन्द्रियबलो विभ्रष्टदन्तावलिः
श्वेतीभूतशिराः सुजर्जरतनुः कम्पाश्रयोऽनाश्रयः ।
लालोच्छिष्टपुरीषमूत्रसलिलक्लिन्नोऽस्मि दीनोऽस्म्यहं
त्राहि त्वं करुणातरङ्गितदृशा शम्भो दयाम्भोनिधे ॥ ४॥

ध्यातं ते पदाम्बुजं सकृदपि ध्यातं धनं सर्वदा
पूजा ते न कृता कृता स्ववपुषः स्रग्गन्धलेपार्चनैः ।
नान्नाद्यैः परितर्पिता द्विजवरा जिह्वैव सन्तर्पिता
पापिष्ठेन मया सदाशिव विभो शम्भो दयाम्भोनिधे ॥ ५॥

सन्ध्यास्नानजपादि कर्म न कृतं भक्त्या कृतं दुष्कृतं
त्वन्नामेश न कीर्तितं त्वतिमुदा दुर्भाषितं भाषितम् ।
त्वन्मूर्तिर्न विलोकिता पुनरपि स्त्रीमूर्तिरालोकिता
भोगासक्तिमता मया शिव विभो शम्भो दयाम्भोनिधे ॥ ६॥

सन्ध्याध्यानजपादिकर्मकरणे शक्तोऽस्मि नैव प्रभो
    दातुं हन्त मतिं प्रतीपकरणे दारादिबन्धास्पदे ।
नामैकं तव तारकं मम विभो ह्यन्यन्न चास्ति क्वचित्
    त्राहि त्वं करुणातरङ्गितदृशा शम्भो दयाम्भोनिधे ॥ ७॥

कुम्भीपाकधुरन्धरादिषु महाबीजादिषु प्रोद्धतं
    घोरं नारकदुःखमीषदपि वा सोढुं न शक्तोऽस्म्यहम् ।
तस्मात् त्वां शरणं व्रजामि सततं जानामि न त्वां विना
    त्राहि त्वं करुणातरङ्गितदृशा शम्भो दयाम्भोनिधे ॥ ८॥

माता वापि पिता सुतोऽपि न हितो भ्रात्रादयो बान्धवाः
    सर्वे स्वार्थपरा भवन्ति खलु मां त्रातुं न केऽपि क्षमाः ।
दूतेभ्यो यमचोदितेभ्य इह तु त्वामन्तरा शङ्कर
    त्राहि त्वं करुणातरङ्गितदृशा शम्भो दयाम्भोनिधे ॥ ९॥

॥ इति शम्भुस्तोत्रं सम्पूर्णम् ॥

Encoded by Sridhar Seshagiri seshagir at engineering.sdsu.edu

*Shambhu Stotram*

pdf was typeset on July 28, 2022

Please send corrections to *sanskrit@cheerful.com*